# Maheshvarakritam Gayatridevi Stotram

# महेश्वरकृतं गायत्रीदेवीस्तोत्रम्

## Document Information

Text title : Maheshvarakritam Gayatridevi Stotram

File name : maheshvarakRRitaMgAyatrIdevIstotram.itx

Category : devii, devI, gAyatrI, stotra, varAhapurANa

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 28/27-32||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# महेश्वरकृतं गायत्रीदेवीस्तोत्रम्

महेश्वर उवाच ।
जयस्व देवि गायत्रि महामाये महाप्रभे ।
महादेवि महाभागे महासत्त्वे महोत्सवे ॥ २७॥

दिव्यगन्धानुलिप्ताङ्गि दिव्यस्रग्दामभूषिते ।
वेदमातर्नमस्तुभ्यं त्र्यक्षरस्थे महेश्वरि ॥ २८॥

त्रिलोकस्थे त्रितत्त्वस्थे त्रिवह्निस्थे त्रिशूलिनि ।
त्रिनेत्रे भीमवक्त्रे च भीमनेत्रे भयानके ।
कमलासनजे देवि सरस्वति नमोऽस्तु ते ॥ २९॥

नमः पङ्कजपत्राक्षि महामायेऽमृतस्रवे ।
सर्वगे सर्वभूतेशि स्वाहाकारे स्वधेऽम्बिके ॥ ३०॥

सम्पूर्णे पूर्णचन्द्राभे भास्वराङ्गे भवोद्भवे ।
महाविद्ये महावेद्ये महादैत्यविनाशिनि ।
महाबुद्ध्युद्भवे देवि वीतशोके किरातिनि ॥ ३१॥

त्वं नीतिस्त्वं महाभागे त्वं गीस्त्वं गौस्त्वमक्षरम् ।
त्वं धीस्त्वं श्रीस्त्वमोङ्कारस्तत्त्वे चापि परिस्थिता ।
सर्वसत्त्वाहिते देवि नमस्ते परमेश्वरि ॥ ३२॥

इत्येवं संस्तुता देवी भवेन परमेष्ठिना ।
देवैरपि जयेत्युच्चैरित्युक्ता परमेश्वरी ॥ ३३॥

इति वराहपुराणे अष्टाविंशाध्यायान्तर्गतं महेश्वरकृतं
गायत्रीदेवीस्तोत्रं समाप्तम् ।

वराहपुराण । अध्याय २८/२७-३२॥

varAhapurANa . adhyAya 28/27-32..

Proofread by PSA Easwaran

*Maheshvarakritam Gayatridevi Stotram*
pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*